चिकः। यथा। प्रायश्चित्तोपदेशाय वस्त्रादिना ब्राह्मणस्तोषणीयः। यथा मिताक्षरायां पराशरः।
"पापं प्रख्यापयेत् पापी धेनुं दत्त्वा तथा वृषं"।
एतच्चोपलक्षणं।
"प्रख्याप्य पापं वक्तृभ्यः किञ्चिद्दत्त्वा व्रतं चरेत्।"
इति स्मृतेः।
देवलवचने "तोषयित्वा द्विजोत्तमान् इति"। अत्र तोषयित्वा इति श्रवणात् आनतिकरत्वेन तद्व्यवच्छिन्नदोषः। इति प्रायश्चित्ततत्त्वं॥

आनद्धं, क्ली, (आनह्यते चर्म्मणा बध्यते इति। आङ्+नह+क्तः।) चर्म्मबद्धमुखवाद्यमात्रं। तत्तु मुरजादि। इत्यमरः॥ कल्पमात्रं। तत्तु वेशभूषादि। इत्यजयपालः॥

आनद्धः, त्रि, (आङ्+नह्+कर्म्मणि+क्तः।) सन्धितः। बद्धः। इति मेदिनी॥ (यथा सुश्रुते।
"छन्नस्तुषारैः सविता हिमानद्धा जलाशयाः"।)

आननं, क्ली, (आनिति अनेन। आङ्+अन्+ल्युट्) मुखं। इत्यमरः॥ ("तदाननं मृत्सुरभि क्षितीश्वरः" इति रघुः। ३। ३।)

आनन्दः, पुं, (आङ्+नन्द+घञ्) आह्लादः। तत्पर्य्यायः। आनन्दथुः २ शर्म्म ३ शातं ४ सुखं ५ मुत् ६ प्रीतिः ७ प्रमोदः ८ हर्षः ९ प्रमदः १० आमोदः ११ संमदः १२। इत्यमरः॥
(यथा, उत्तरचरिते।
"यत्रानन्दाश्च मोदाश्च यत्र स्निग्धाश्च सम्पदः"।
मनुः।
"आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन"।)
वासुदेवस्य बलविशेषः। इति हेमचन्द्रः॥

आनन्दः, त्रि, (आनन्द+अर्श आदित्वात् अच्।) आनन्दविशिष्टः। हर्षयुक्तः। सुखी। इत्यमरटीका॥ ("गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति"। इत्यमरोक्तेः अत्र गुणिलिङ्गः।)

आनन्दथुः, पुं, (आङ्+नन्द+अथुच्।) आनन्दः। हर्षः। इत्यमरः॥ तद्युक्ते त्रि॥

आनन्दनं, क्ली, (आङ्+नदि+ल्युट्) गमनागमनसमये सुहृदादेरालिङ्गनारोग्यस्वागतादिप्रश्नादिद्वारा आनन्दोत्पादनं। तत्पर्य्यायः। सभाजनः २ सभाजनः ३ सुभाजनः ४ आप्रश्नः ५ आमन्त्रणं ६॥ इत्यमरः तट्टीका च॥ (आनन्दजननं, हर्षोत्पादनं। प्रमोदकरः, सुखजनकः। यदुक्तं।
"मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः"।
इति हितोपदेशे।)

आनन्दपटं, क्ली, (आनन्दाय पटम्।) नवोढ़ावस्त्रं। इति हारावली॥

आनन्दप्रभवं, क्ली. (आनन्दः प्रभवोयस्य तत्।) रेतः। वीर्य्यं। इति हेमचन्द्रः॥
("वाय्वाकाशादिभिर्भावैः सौषिर्य्यं जायतेऽस्थिषु।
तेन स्रवन्ति तच्छुक्रं नवात् कुम्भादिवोदकं॥
स्रोतोभिः स्यन्दते देहात् समन्तात् शुक्रवाहिभिः।
हर्षणोदीरितं रागात् सङ्कल्पाच्च मनोभवात्॥
वस्तौ संभृत्य निर्य्याति स्यन्नाश्मादिवोदकं।"
इति चरकः॥
"क्षयदेहाश्रितं शुक्रं प्रसन्नमनसस्तथा।
स्त्रीषु व्यायच्छतश्चापि हर्षात्तत् संप्रवर्त्तते॥"
इति सुश्रुतः॥)

आनन्दमयकोषः, पुं, (आनन्दमयस्य परमात्मनः कोष इवावरकः।) सत्त्वप्रधानाज्ञानं। तत्पर्य्यायः। कारणशरीरं २ सुषुप्तिः ३। इति वेदान्तः॥

आनन्दा, स्त्री, (आनन्दयति या। आङ्+नन्द+णिच्+अच्+टाप्) विजया। आरामशीतला। इति राजनिर्घण्टः॥ [इति शब्दमाला॥

आनन्दिः, पुं, (आङ्+नन्द+किः।) आनन्दः। हर्षः।

आनन्दितः, त्रि, (आङ्+नन्द+क्त। यद्वा आनन्दः संजातोऽस्य। आनन्द+इतच्।) आनन्दयुक्तः। हृष्टः। आह्लादितः॥ (यथा महाभारते॥
"पुनरानन्दिताः सर्व्वे मथुरायां वसामहे॥")

आनन्दी, [न्] त्रि, (आनन्द+इनि।) आनन्दविशिष्टः॥

आनन्दी, स्त्री, वृक्षविशेषः। आकन्दपाता इति ख्याता। इति शब्दचन्द्रिका॥

आनयः, पुं, (आनीयते वेदाध्ययनायात्र। आङ्+णीञ+अच्) उपनयनं। इति हेमचन्द्रः॥

आनयनं, क्ली, (आङ्+नी+ल्युट्।) स्थानान्तरनयनं। आना इति भाषा॥ (यथा रामायणे।
"आदिशत् पुरुषांस्तत्र राज्ञामानयने बहून्"।)

आनर्त्तः, पुं, (आङ्+नृत्+घञ्।) देशविशेषः। द्वारका इति ख्याता। नृत्यस्थानं। युद्धं। इत्यमरः॥ जलं। इति मेदिनी॥ आनर्त्तदेशवासी लोकः। इत्यमरटीका॥ (यथा हरिवंशे। "आनर्त्तान् कालकूटांश्च कुलिन्दांश्च विजित्य सः"॥
स्वनामख्यातो राजा।
"शर्य्यातेर्मिथुनं त्वासीदानर्त्तो नाम विश्रुतः।
"आनर्त्तस्य तु दायादो रेवो नाम महाद्युतिः"॥
"आनर्त्तविषयश्चासीत् पुरी चास्य कुशस्थली"।
"आनर्त्तस्तु विभोः पुत्रः सुकुमारस्ततोऽभवत्"॥)

आनायः, पुं, (आङ्+णीञ्+घञ्।) जालं। इत्यमरः॥

आनाय्यः, पुं, (आनाय्यते गार्हपत्यादानीय संस्क्रियतेऽसौ आङ्+नी+ण्यत्।) दक्षिणाग्निः। इत्यमरः॥ गार्हपत्यादग्नेरानीय यो दक्षिणाग्निरारोप्यते। तत्र। इति भरतः॥ होम करिवार निमित्ते घर हइते आनिया दक्षिणदिके राखा आगुन् इति भाषा॥

आनाहः, पुं, (आङ्+नह्+घञ्।) मूत्रपुरीषरोधकरोगः। तत्पर्य्यायः। विबन्धः २। इत्यमरः॥ विष्टम्भः ३ मलरोधनः ४। इति राजनिर्घण्टः॥ ("आनाहार्त्तं ततो दृष्ट्वा तत्सैन्यमसुखार्द्दितम्"। इति महाभारते।) तस्य सम्प्राप्तिरूपे। यथा,
"आमं शकृद्वा निचितं क्रमेण
भूयो विबद्धं विगुणानिलेन।
प्रवर्त्तमानं न यथास्वमेनं
विकारमानाहमुदाहरन्ति"॥ इति निदानं॥
("यस्य वातः प्रकुपितः कुक्षिमाश्रित्य तिष्ठति।
नाधो व्रजति नाप्यूर्द्ध्वमानाहस्तस्य जायते"॥
इति चरकः॥
अस्य चिकित्सामाह। भावप्रकाशे यथा,—
"तुल्यकारणकार्य्यत्वादुदावर्त्तहरीं क्रियां।
आनाहेषु च कुर्व्वीत विशेषश्चाभिधीयते॥ *॥
त्रिवृत्कृष्णाहरीतक्यो द्विचतुःपञ्चभागिकाः।
गुड़ेन तुल्या गुटिका हरत्यानाहमुल्वणं॥ *॥
वर्त्तिस्त्रिकटुसैन्धव
सर्षपगृहधूमकुष्ठमदनफलैः।
मधुनि गुड़े वा पक्वै-
र्विहिता साङ्गुष्ठसम्मिता विज्ञैः॥
वर्त्तिरियं दृष्टफला
शनैः प्रणिहिता गुदे घृताभ्यक्ता।
आनाहमुदरजार्त्तिं
शमयति जठरं तथा गुल्मम्"॥ *॥
इति त्रिकट्वाद्यावर्त्तिः॥ *॥
चक्रपाणिसङ्ग्रहे तु चिकित्सा यथा,—
"उदावर्त्तक्रियानाहे सामे लङ्घनपाचनम्"॥
"द्विरुत्तरा हिङ्गुवचा सकुष्ठा
सुवर्चिका चेति विड़ङ्गचूर्णं।
सुखाम्बुनानाहविसूचिकार्त्ति-
हृद्रोगगुल्मोर्द्ध्वसमीरणघ्नम्॥ *॥
वचाभयाचित्रकयावशूकान्
सपिप्पलीकातिविषान् सकुष्ठान्।
उष्णाम्बुनानाहविमूढ़वातान्
पीत्वा जयेदाशु हितौदनाशी॥ *॥
त्रिवृद्धरीतकीश्यामाः स्नुहीक्षीरेण भावयेत्।
वटिका मूत्रपीतास्ता ज्येष्ठा आनाहभेदिकाः॥ *॥
राठ-धूम-विड़व्योष-गुड़-मूत्रैर्विपाचिता।
गुदेऽङ्गुलसमावर्त्तिर्निधेयानाहशूलनुत्॥ *॥
मूलकं शुष्कमार्द्रञ्च वर्षाभूमूलपञ्चकम्।
आरेवतफलञ्चापि पक्वा तेन पचेद्घृतम्।
तत् पीतमात्रं शमयेदुदावर्त्तमसंशयम्"॥ *॥
शुष्कमूलकाद्यं घृतम्॥ *॥) दैर्घ्यं। इति रमानाथः॥

आनिलिः, पुं, (अनिलस्य वायोरपत्यं अनिल+इञ्।) हनूमान्। इति त्रिकाण्डशेषः॥ (भीमः।)

आनिली, स्त्री, (अनिल+अण्+ङीप्।) स्वातिनक्षत्रं। इति हेमचन्द्रः॥

आनीलः, पुं, नीलघोटकः। इति हेमचन्द्रः॥ (असितः। ईषन्नीलः। यथा किरातार्ज्जुनीये,
"आनीलाभैर्विरचितपरभागा रत्नैः"।)

आनुकूल्यं, क्ली, (अनुकूल+ष्यञ्।) अनुकूलता॥ (साम्मुख्यं। प्रसादः। सहायता। यथा याज्ञवल्क्यः।
"यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते"।
यथा,—रामायणे।
"रमतश्चानुकूल्येन ययुः संवत्सरा दश"।)

आनुगत्यं, क्ली, (अनुगतस्य भावः कर्म्म वा। अनुगत+ष्यञ्।) अनुगतत्वं। अनुगतस्य भाव इत्यर्थे ष्यप्रत्ययेन निष्पन्नम्॥

आनुपूर्व्वी, स्त्री, क्ली, (अनुपूर्व्व+ष्यञ्।) परिपाटी। अनुक्रमः। इत्यमरः॥ (यथा मनुः ३। २३।
"षड़ानुपूर्व्व्या विप्रस्य क्षत्रस्य चतुरो वरान्"॥
यथा रामायणे।
"आनुपूर्व्व्या स धर्म्मज्ञः पप्रच्छ कुशलं कुले"।)